योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०८७

सप्ताशीतितमः सर्गः ८७

शिखिध्वज उवाच ।

सर्गे स्फुरद्भिर्मत्पुण्यैर्मन्ये संप्रेषितो भवान् ।

अलक्ष्यैः संभृतैरद्रौ बृहद्वातैरिवाम्बुदः ।। १

अद्य तिष्ठाम्यहं साधो धन्यानां धुरि धर्मतः ।

अमृतस्यन्दिवचसा यत्त्वयास्मि समागतः ।। २

न केचन तथा भावाश्चेतः शीतलयन्ति मे ।

राज्यलाभादयोऽप्येते यथा साधुसमागमः ।। ३

निरर्गलरसो यत्र सामान्येन विजृम्भते ।

मुक्तरागादिमननं तत्कल्पनसुखावहम् ।। ४

श्रीवसिष्ठ उवाच ।

एवंवादिनि सैवास्य वाक्यमाक्षिप्य भूपतेः ।

भूयः प्रोवाच चूडाला मुनिदारकरूपिणी ।। ५

चूडालोवाच ।

आस्तामेषा कथा तावत्सर्वं ते वर्णितं मया ।

त्वं मे कथय हे साधो कस्त्वमद्रौ करोषि किम् ।। ६

कियत्पर्यवसानेयं भवतो वनवासिता ।

सत्यं कार्यं च नोऽसत्यं वक्तुं जानन्ति तापसाः ।। ७

शिखिध्वज उवाच ।

देवपुत्रोऽसि जानासि सर्वमेव यथास्थितम् ।

लोकवृत्तान्ततज्ज्ञोऽसि किमन्यत्कथयाम्यहम् ।। ८

संसारभयभीतत्वान्निवसामि वनान्तरे ।

जानतोपि हि मामार्य कथयाम्येव ते मनाक् ।। ९

शिखिध्वजोऽहं भूपालस्त्यक्त्वा राज्यमिहास्थितः ।

भृशं भीतोस्मि तत्त्वज्ञ संसृतौ जन्मनः पुनः ।। १०

सुखं पुनः पुनर्दुःखं पुनर्मरणजन्मनी ।

भवतस्तेन तप्येऽहं तत्त्वज्ञ वनवीथिषु ।। ११

भ्रमन्नपि दिगन्तेषु चरन्नपि परंतपः ।

नासादयामि विश्रान्तिमेकां निधिमिवाधनः ।। १२

अयत्नोऽप्यफलोऽप्येको ह्यपूर्णोऽप्यस्तसंगतिः ।

शुष्याम्यत्र वने साधो घुणक्षुण्ण इव द्रुमः ।। १३

इमामखण्डितां सम्यक् क्रियां संपादयन्नपि ।

दुःखाद्गच्छामि दुःखौघममृतं मे विषं स्थितम् ।। १४

चूडालोवाच ।

पितामहमहं पूर्वं कदाचित्पृष्टवानिदम् ।

यत्क्रियाज्ञानयोरेकं श्रेयस्तद्ब्रूहि मे प्रभो ।। १५

ब्रह्मोवाच ।

ज्ञानं हि परमं श्रेयः कैवल्यं तेन वेत्त्यलम् ।

कालातिवाहनायैव विनोदायोदिता क्रिया ।। १६

अलब्धज्ञानदृष्टीनां क्रिया पुत्रपरायणम् ।

यस्य नास्त्यम्बरं पट्टं कम्बलं किं त्यजत्यसौ ।। १७

वासनामात्रसारत्वादज्ञस्य सफलाः क्रियाः ।

सर्वा एवाफला ज्ञस्य वासनामात्रसंक्षयात् ।। १८

सर्वा हि वासनाभावे प्रयान्त्यफलतां क्रियाः ।

अशुभाः फलवन्त्योपि सेकाभावे लता इव ।। १९

ऋत्वन्तरे यथा याति विलयं पूर्वमार्तवम् ।

तथैव वासनानाशे नाशमेति क्रियाफलम् ।। २०

न स्वभावेन फलति यथा शरलता फलम् ।

क्रिया निर्वासना पुत्र फलं फलति नो तथा ।। २१

सयक्षवासनो बालो यक्षं पश्यति नान्यथा ।

सदुःखवासनो मूढो दुःखं पश्यति नान्यथा ।। २२

आकारभासुरात्युच्चैर्न ददाति फलं क्रिया ।

शुभाशुभा वा तज्ज्ञस्य फुल्ला शरलता यथा ।। २३

वासना चेह नास्त्येव साहंकारादिरूपिणी ।

असत्यैवोदिता मौर्ख्यान्मरुभूमाविवाम्बुधिः ।। २४

यस्य मौर्ख्यं क्षयं यातं सर्वं ब्रह्मेति भावनात् ।

नोदेति वासना तस्य प्राज्ञस्येवाम्बुधिर्मरौ ।। २५

वासनामात्रसंत्यागाज्जरामरणवर्जितम् ।

पदं भवति जीवोऽन्तर्भूयो जन्मविवर्जितम् ।। २६

सवासनं मनो ज्ञेयं ज्ञानं निर्वासनं मनः ।

ज्ञानेन ज्ञेयमभ्येत्य पुनर्जीवो न जायते ।। २७

चूडालोवाच ।

ज्ञानमेव परं श्रेय इति ब्रह्मादयोऽपि ते ।

प्राहुर्महान्तो राजर्षे त्वं किमज्ञानवान्स्थितः ।। २८

इतः कमण्डलुरितो दण्डकाष्ठमितो बृसी ।

इत्यनर्थविलासेऽस्मिन्रमसे किं महीपते ।। २९

कोऽहं कथमिदं जातं कथं शाम्यति चेति भोः ।

राजन्नावेक्षसे कस्मात्किमज्ञ इव तिष्ठसि ।। ३०

कथं बन्धः कथं मोक्ष इति प्रश्नानुदाहरन् ।

पारावारविदां पादान्कस्माद्राजन्न सेवसे ।। ३१

दुःस्पन्दसंविदा शैलकोटरे क्रिययानया ।

जीवितं क्षिपयन्किं त्वं शिलाकीटवदास्थितः ।। ३२

साधूनां समदृष्टीनां परिप्रश्नेन सेवया ।

संगमेन च सा युक्तिर्लभ्यते मुच्यते यया ।। ३३

साधुनैव समं ग्रासं भुञ्जानो वनकोटरे ।

तिष्ठावष्टब्धदुश्चेष्टो धराविवरकीटवत् ।। ३४

श्रीवसिष्ठ उवाच ।

कान्तया देवरूपिण्या तयैवं प्रतिबोधितः ।

अश्रुपूर्णमुखो वाक्यं शिखिध्वज उवाच ह ।। ३५

शिखिध्वज उवाच ।

अहो नु बोधितोऽस्म्यद्य चिरात्सुरसुत त्वया ।

मौर्ख्यादार्यसमासङ्गं मुक्त्वाहमवसं वने ।। ३६

अहो नु मे क्षयं यातं मन्ये पापमशेषतः ।

यत्त्वमेव समागत्य संप्रबोधयसीह माम् ।। ३७

गुरुस्त्वं मे पिता त्वं मे मित्रं त्वं मे वरानन ।

शिष्यो नमस्करोम्यद्य पादौ तव कृपां कुरु ।। ३८

यदुदारतमं वेत्सि यस्मिन् ज्ञाते न शोच्यते ।

भवामि निर्वृतो येन तद्ब्रह्मोपदिशाशु मे ।। ३९

घटज्ञानादयो ज्ञाने विभागाः सन्त्यनेकशः ।

ज्ञानानां परमं ज्ञानं कतरत्तारकं भवेत् ।।

चूडालोवाच ।

यद्युपादेयवाक्योऽहं राजर्षे तद्वदामि ते ।

यथा ज्ञानमिदं किंचिन्न वक्ष्ये स्थाणुकाकवत् ।। ४१

अनुपादेयवाक्यस्य वक्तुः पृष्टस्य लीलया ।

व्रजन्त्यफलतां वाचस्तमसीवाक्षसंविदः ।। ४२

शिखिध्वज उवाच ।

यद्वक्षि तदुपादेयं मया विधिरिव श्रुतेः ।

अविचारितमेवाशु सत्यमेतद्वचो मम ।। ४३

चूडालोवाच ।

यथा बालः पितुर्वाक्यं मुक्तहेतूपपादनम् ।

आदत्ते हि तथैव त्वं गृहाणैतद्वचो मम ।। ४४

श्रवणानन्तरं बुद्ध्या शुभमित्येव भावयन् ।

श्रृणु गीतमिव त्यक्त्वा हेत्वर्थित्वं वचो मम ।। ४५

स्वचरितसदृशं तथोदयन्त्या-

श्चिरसमयेन विबोधनं च बुद्धेः ।

भवभयसुतरं महामतीनां

श्रृणु कथयामि कथाक्रमं मनोज्ञम् ।। ४६

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषु निर्वाण० पू० चू० शिखिध्वजावबोधो नाम

सप्ताशीतितमः सर्गः ।।८७।।